**अर्थसिद्धि** स्त्री अर्थतः योग्यान्वयवशात् सिद्धिः। १अपदार्थस्य तात्पर्य्यविधया सिद्धौ। ६त०। २धनसिद्धौ।

**अर्थहर** त्रि० अर्थान् धनानि हरति ताच्छील्यादौ ट स्त्रियां ङीप्। परकीयधनहरणशीले चौरादौ।

**अर्थहीन** त्रि० अर्थेन धनेन हीनः। १धनहीने दरिद्रे। २वाच्यार्थहीने च।

**अर्थागम** पु० अर्थस्य आगमः। १आये। अर्थागमोनित्यमरोगिता च"नीति०। अर्थ आगमस्यतेऽनेन करणे घञ्। २धनार्जनोपाये क्रयादौ। ३वाच्याद्यर्थापतने च "दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते" सा०द०।

**अर्थान्तर** न० अन्योऽर्थः अर्थान्तरं मयू०त०। १अन्यार्थे, "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति" सांख्यम्। न्यायमते उद्देश्यसिद्ध्यर्थं प्रयुक्ते शब्दसामर्थ्यादनुद्देश्यसिद्ध्यनुकूले २वाक्ये। तस्य प्रतिवादिनोद्भावने वादिनिग्रहः। "प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासोहेत्वन्तरमर्थान्तरं फलमित्यादि" गौ० सूत्रेण निग्रहस्थानान्युक्त्वा "प्रकृतादर्थादसम्बन्धार्थोऽर्थान्तरमिति" लक्षितम्। प्रकृतात् प्रकृतोपयुक्तात् ल्यब्लोपे पञ्चमी तेन प्रकृतोपयुक्तमर्थमुपेक्ष्यासम्बन्धार्थाभिधानमर्थान्तरं प्रकृतानाकाङ्क्षिताभिधानमिति फलितार्थः यथा शब्दोऽनित्यः कृतकत्वात् इत्युक्त्वा शब्दोगुणः स चाकाशस्येत्याद्युक्तिः" न्या०वृत्तिः। शब्दस्यानित्यत्वसाधने प्रवृत्ते तस्य गुणत्वस्याकाशवृत्तित्वस्य चसाधने प्रकृतोपयोगित्वं नास्तीति तस्य तथात्वम्। विवरणं निग्रहस्थानशब्दे। अर्थशब्दस्य कारणपरत्वे २कारणान्तरे 'अर्थोऽयमर्थान्तरलभ्य एव" कुमा० "अर्थान्तरेण कारणान्तरेण लभ्य" इति मल्लि०।

**अर्थान्तरन्यास** पु० अर्थान्तरं न्यास्यतेऽत्र। अर्थालङ्कारभेदे "सामन्यं वा विशेषेण विशेषस्तेन वा यदि। कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते॥ साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः"। क्रमेणोदाहरणानि। "वृहत्सहायःकार्य्यान्तं क्षोदीयानपि गच्छति। सम्भूयाम्भोधिमभ्येति महानद्या नगापगा"॥ अत्र द्वितीयार्द्धगतः सामान्योऽर्थः सोपपत्तिकः क्रियते। "यावदर्थपदां वाचमेवमाधाय माधवः। विरराम महीयांसः प्रकृत्या मितभाषिणः" अत्र सामान्येन विशेषसमर्थनम्। "पृथ्वि! स्थिरा भव भुजङ्गम! धारयैनां त्वं कूर्मराज! तदिदं द्वितीयं दधीथाः। दिक्कुञ्जराः! कुरुत तत्त्रितये दिधीर्षां राज्ञः करोति हरकार्मुकमाततज्यम्" अत्राततज्याकरणं पृथ्वीस्थैर्य्यादेः कार्य्यस्य समर्थकम्। "सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः" इत्यादौ सम्पद्वरणं कार्य्यं सहसा विधानाभावस्य विमृश्यकारित्वरूपस्य कारणस्य समर्थकम्। एतानि साधर्म्ये उदाहरणानि वैधर्म्ये यथा "इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्। शाम्येत् प्रत्यपकारेण नोपकारेण दुर्ज्जनः"॥ अत्र समान्यं विशेषस्य समर्थकम्। "सहसा विदधीतेति' अत्र सहसा विधानाभावस्यापत्पदत्वं विरुद्धं कार्य्यं समर्थकम्" सा०द०।

**अर्थापत्ति** स्त्री अर्थस्य अनुक्तार्थस्य आपत्तिः सिद्धिः। शब्देनानुपस्थापितार्थस्यसिद्धिरूपे मीमांसकोक्ते १प्रमितिभेदे। यथा पीनोदेवदत्तोदिवा न भुङ्क्ते इत्यादौ पीनत्वविशिष्टस्य देवदत्तस्य रात्रिभोजित्वरूपार्थस्य शब्दानुक्तस्यापि सिद्धिः। अर्थस्यापत्तिर्यतः। २तत्साधने च यथोक्तं वे० प०। "तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। तत्रोपपाद्यज्ञानं करणम् उपपादकज्ञानं फलम्। येन विना यदनुपपन्नं तत्तत्रोपपाद्यम् यस्याभावे यस्यानुपपत्तिः तत्तत्रोपपादकं यथा रात्रिभोजनेन विना दिवाअभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशं पीनत्वमुपपाद्यं यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकं रात्रिभोजनकल्पनारूपायां प्रमितौ, अर्थस्यापत्तिः कल्पनेति षष्ठीसमासेनार्थापत्तिशब्दोवर्त्तते। कल्पनाकरणे पीनत्वादिज्ञाने तु अर्थस्यापत्तिः कल्पना यस्मादिति बहुब्रीहिसमासेन वर्त्तते इति फलकरणयो रुभयोस्तत्प्रयोगः। नचेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति अन्वयव्याप्त्यज्ञानेनान्वयिष्वनन्तर्भावात्। व्यतिरेकिणश्चानुमापकत्वं प्रागेव निरस्तम् अतएवार्थापत्तिस्थलेऽनुमीनोमीति नानुव्यवसायः किन्त्वनेनेदं कल्पयामीति"। "अद्वैतागमनासीरे साधुसा धुन्वती परान्। सेवामेवार्ज्जयत्यर्थापत्तिपत्तिपरम्परा" ख०खा०। सांख्यादिभिस्तु नेयं प्रमाणान्तरमपि तु अनुमानेऽन्तर्भवतीत्युक्तम् यथा "एवमर्थापत्तिरपि न प्रमाणान्तरं तथाहि जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनमर्थापत्तिरभिमता वृद्धानां साप्यनुमानमेव। यदा खलु व्यापकः सन्नेकत्र नास्ति तदान्यत्रास्ति, यदा व्यापकएकत्रास्ति तदान्यत्र नास्तीति सुकरः स्वशरीरे एव व्याप्तिग्रहः। तथाच सति गृहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानमेव। न च चैत्रस्य क्वचि-